श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ नवाधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ नवाधिकशततमः सर्गः ॥

## विभीषणस्य विलापः श्रीरामेण तस्य प्रबोधनपूर्वकं रावणान्त्येष्टिसंस्कारार्थं तं प्रत्यादेशदानम्

भ्रातरं निहतं दृष्ट्वा शयानं निर्जितं रणे।
शोकवेगपरीतात्मा विललाप विभीषणः॥ **6.109.1** ॥

वीरविक्रान्त विख्यात प्रवीण नयकोविद।
महार्हशयनोपेत किं शेषे निहतो भुवि॥ **6.109.2** ॥

निक्षिप्य दीर्घौ निश्चेष्टौ भुजावङ्गदभूषितौ।
मुकुटेनापवृत्तेन भास्कराकारवर्चसा॥ **6.109.3** ॥

तदिदं वीर सम्प्राप्तं यन्मया पूर्वमीरितम्।
काममोहपरीतस्य यत् तन्न रुचितं तव॥ **6.109.4** ॥

यन्न दर्पात् प्रहस्तो वा नेन्द्रजिन्नापरे जनाः।
न कुम्भकर्णोऽतिरथो नातिकायो नरान्तकः।
न स्वयं बहु मन्येथास्तस्योदर्कोऽयमागतः॥ **6.109.5** ॥

गतः सेतुः सुनीतानां गतो धर्मस्य विग्रहः।
गतः सत्त्वस्य सङ्क्षेपः सुहस्तानां गतिर्गता॥ **6.109.6** ॥

आदित्यः पतितो भूमौ मग्नस्तमसि चन्द्रमाः।
चित्रभानुः प्रशान्तार्चिर्व्यवसायो निरुद्यमः।
अस्मिन् निपतिते वीरे भूमौ शस्त्रभृतां वरे॥ **6.109.7** ॥

किं शेषमिहलोकस्य गतसत्त्वस्य सम्प्रति।
रणे राक्षसशार्दूले प्रसुप्त इव पांसुषु॥ **6.109.8** ॥

धृतिप्रवालः प्रसभाग्र्यपुष्प -
    स्तपोबलः शौर्यनिबद्धमूलः।
रणे महान् राक्षसराजवृक्षः
    सम्मर्दितो राघवमारुतेन॥ **6.109.9** ॥

तेजोविषाणः कुलवंशवंशः
    कोपप्रसादापरगात्रहस्तः।
इक्ष्वाकुसिंहावगृहीतदेहः
    सुप्तः क्षितौ रावणगन्धहस्ती॥ **6.109.10** ॥

पराक्रमोत्साहविजृम्भितार्चि -
    र्निःश्वासधूमः स्वबलप्रतापः।
प्रतापवान् संयति राक्षसाग्नि -
    र्निर्वापितो रामपयोधरेण॥ **6.109.11** ॥

सिंहर्क्षलाङ्गूलककुद्विषाणः
    पराभिजिद्गन्धनगन्धवाहः।
रक्षोवृषश्चापलकर्णचक्षुः
    क्षितीश्वरव्याघ्रहतोऽवसन्नः॥ **6.109.12** ॥

वदन्तं हेतुमद्वाक्यं परिदृष्टार्थनिश्चयम्।
रामः शोकसमाविष्टमित्युवाच विभीषणम्॥ **6.109.13** ॥

नायं विनष्टो निश्चेष्टः समरे चण्डविक्रमः।
अत्युन्नतमहोत्साहः पतितोऽयमशङ्कितः॥ **6.109.14** ॥

नैवं विनष्टाः शोचन्ते क्षत्रधर्मव्यवस्थिताः।
वृद्धिमाशंसमाना ये निपतन्ति रणाजिरे॥ **6.109.15** ॥

येन सेन्द्रास्त्रयो लोकास्त्रासिता युधि धीमता।
तस्मिन् कालसमायुक्ते न कालः परिशोचितुम्॥ **6.109.16** ॥

नैकान्तविजयो युद्धे भूतपूर्वः कदाचन।
परैर्वा हन्यते वीरः परान् वा हन्ति संयुगे॥ **6.109.17** ॥

इयं हि पूर्वैः सन्दिष्टा गतिः क्षत्रियसम्मता।
क्षत्रियो निहतः सङ्ख्ये न शोच्य इति निश्चयः॥ **6.109.18** ॥

तदेवं निश्चयं दृष्ट्वा तत्त्वमास्थाय विज्वरः।
यदिहानन्तरं कार्यं कल्प्यं तदनुचिन्तय॥ **6.109.19** ॥

तमुक्तवाक्यं विक्रान्तं राजपुत्रं विभीषणः।
उवाच शोकसन्तप्तो भ्रातुर्हितमनन्तरम्॥ **6.109.20** ॥

योऽयं विमर्देष्वविभग्नपूर्वः
    सुरैः समस्तैरपि वासवेन।
भवन्तमासाद्य रणे विभग्नो
    वेलामिवासाद्य यथा समुद्रः॥ **6.109.21** ॥

अनेन दत्तानि वनीपकेषु
    भुक्ताश्च भोगा निभृताश्च भृत्याः।
धनानि मित्रेषु समर्पितानि
    वैराण्यमित्रेषु च यापितानि॥ **6.109.22** ॥

एषोऽहिताग्निश्च महातपाश्च
वेदान्तगः कर्मसु चाग्र्यशूरः।
एतस्य यत् प्रेतगतस्य कृत्यं
तत् कर्तुमिच्छामि तव प्रसादात्॥ **6.109.23**॥

स तस्य वाक्यैः करुणैर्महात्मा
सम्बोधितः साधु विभीषणेन।
आज्ञापयामास नरेन्द्रसूनुः
स्वर्गीयमाधानमदीनसत्त्वः॥ **6.109.24**॥

मरणान्तानि वैराणि निर्वृत्तं नः प्रयोजनम्।
क्रियतामस्य संस्कारो ममाप्येष यथा तव॥ **6.109.25**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे नवाधिकशततमः सर्गः॥